67/4

शाङ्करनये लौकिकन्यायाः

डा. सुकान्तकुमारसेनापतिः

शाङ्करनये लौकिकन्यायाः

सुकान्तः
6-1-2002

लेखकः
डॉ० सुकान्तकुमारसेनापतिः

लेखकः डा० सुकान्तकुमार सेनापतिः
संयुक्तपरियोजना समन्वयकः
राष्ट्रियसंस्कृतपरियोजना
एन.सी.ई.आर.टी., श्री अरविन्दोमार्गः
नवदेहली-16
दूरभाषः 011- 5531005
कम्प्यूटरीकरणकर्त्ताः श्री अशोककुमार
दूरभाषः 011- 6564173
मुद्रकः नेशनल मार्किटिंगस्
दिल्ली-6
दूरभाषः 011-5407546,98110-14522

मूल्यम् : 12/- (रुप्यकाणि)

॥ श्री ॥

श्रुतिस्मृतिपुराणानामालयं करुणालयम्।
नमामि भगवत्पादं शङ्करं लोकशङ्करम्॥

यत्पादयोरन्ति वसन्नवापं,
दुराममप्युत्तरतन्त्रभावम्।
सदैव तच्छीलकुटुम्बशास्त्रि,
गुरोः स्मृतिः वासयतां धियं मे॥

प्रास्ताविकम्

भारतीयदार्शनिकविचारसम्पत्तिः अतीव विस्तृता बहुगम्भीरा च, तत्र अद्वैतवेदान्तदर्शनस्य गाम्भीर्यं वैशद्यं च अन्यादृशम् उत्तमोत्तमं च चकास्ति। सर्वेष्वपि भारतीयदर्शनेषु दुरूहाणां दार्शनिकविचारणां सुलभावगमाय नैकविधाः शैक्षणिकविधयः प्रवर्तिताः आसन्। एते विधयः न केवलम् अर्वाचीनशिक्षाविज्ञानेन प्रवर्तितानां विधीनां सर्वात्मनाममानस्वरूपाः सन्ति, अपितु साफल्यविषये ततोऽप्यतिशयिताः विराजन्ते। स्वयं च श्रीमदशंकरभगवत्पादाचार्यैः स्वीये ब्रह्मसूत्रभाष्ये एतेषां विधीनां समुचितसन्निवेशः कृतो दृश्यते। तेषु मीमांसादिदर्शनपरम्परामनुसृत्य लोकसिद्धन्यायानां शास्त्रे सञ्चारकरणम् इत्येषः अत्यन्तोपकारको विधिः।

नवदेहलीस्थ-राष्ट्रियशैक्षिकानुसन्धानपरिषदन्तर्गतायां राष्ट्रियसंस्कृतपरियोजनायां संयुक्तपरियोजनासमन्वयकपदे कार्यं कुर्वता मम प्रियशिष्येण आयुष्मता सुकान्तसेनापतिना विरचितम् "शांकरनये लौकिकन्यायाः" इति पुस्तकं मया अवलोकितम्। एतस्मिन् प्रायः पञ्चत्रिंशत् न्यायाः उपस्थापिताः सन्ति। पुस्तकेऽस्मिन् एकैकस्य लोकन्यायस्यार्थनिरूपणम्, ततः तत्तल्लोकन्यायस्य भाष्ये सन्दर्भप्रदर्शनम्, तल्लोकन्यायस्य सन्दर्भे भाष्यकारेण प्रयुक्तानां वाक्यानामर्थविवरणम् इत्ययं क्रमः परिलक्षितः। पुस्तकस्य प्रस्तावनायां न्यायशब्दस्य प्रयोगः केषु केषु सन्दर्भेषु श्रीशंकरभगवत्पादाः भाष्ये अकुर्वन् इति सम्यक् संकलितम्। एतत्सर्वं सरलेन संस्कृतेन ग्रन्थकर्त्ता साधु निरूपितवान्।

स्थालीपुलाकन्यायेन एतस्मिन् पुस्तके विद्यमानं विशेषं सूचयामि तद्यथा-कस्यापि सामान्यतो ज्ञातस्य अर्थस्य दृढीकरणसन्दर्भे

स्थूणानिखन्नन्यायस्य, अन्यमतनिराकरणसन्दर्भे प्रधानमल्लनिवर्हणन्यायस्य, कार्यकारणयोरभेदबोधनसन्दर्भे समुद्रतरंगन्यायस्य, सर्वशक्तिमतः ईश्वरस्य सर्वकार्यसम्पादनम् अत्यन्तसुलभम् इति सन्दर्भे लीलान्यायस्य, असम्भवविषये कृतः प्रयत्नः व्यर्थः इति सन्दर्भे काकदन्तपरीक्षणन्यायस्य च निरूपणं नितरां विलक्षणम् अस्ति। अन्ये ये लोकन्यायाः पुस्तकेऽस्मिन् उपस्थापिताः ते रूचिपूर्णाः मनोरमाः च सन्ति। एतादृशकार्यस्य सम्पादने ग्रन्थकर्त्तुः एषः प्रयासः श्लाघ्यः इति भावयामि। एतत् पुस्तकं जिज्ञासूनां छात्राणां कृते अवश्यम् उपकारकं प्रेरणादायकं च भविष्यति इति विश्वसिमि। अन्ते आयुष्मतः सुकान्तस्य स्वाभीष्टे अद्वैतवेदान्तशास्त्रे इतोऽपि प्रवृत्तिः वर्धताम् इति मंगलाशासनपूर्वकं कामये।

प्रो० वेम्पटि कुटुम्बशास्त्री
निदेशकः
राष्ट्रियसंस्कृतसंस्थानम्
नवदेहली

Forward

Theory and practice are the two sides of the same coin. A vaterial scholars always finds harmony and equilibrium between the two. It is true for all disciplines scientific or esoteric.So great scholars like Adisankaracharya whose Advita Vedanta, the top philosophy of the world even today, balances the two in a harmonious way. If one searches for such harmonious balance between theory and practice he find about 35 examples in Brahmasutra Bhashyam. Such great scholars are scholars among scholars and laymen. Yes! among layman, it is their greatness. Sankracharya in the said bhashya referred to such Lokanyayas in order to explain vedantic theories which are highly intangible. The modern pedagogy endorses that any abstract concept can be taught easily through examples from our everyday life.

Dr. Sukant Senapati whom I know from his boyhood, i.e. since 1 ½ decades has been studying Advait Vedanta under Prof. V.Kutumba Sastry who is almost a twin to me. Dr. Senapati at present working with me in a holy project 'Teach Sanskrit Through Sanskrit' and I am very happy that he has an excellent idea of putting together such Lokanyayas of a great scholar Adi Shankracharya in a simple form so that both masses and elite will be delighted. I hope that Dr. Senapati will extend his study to all other works of Adi Shankracharya also in future.

I bless him that he should forward such creative works through out his career.

Prof. Subbarayan Peri
Coordinator
National Sanskrit Project

Forward

[illegible] advaitic are the two sides of the same coin. A [illegible] always finds harmony and equilibrium between the two. It is true for all disciplines scientific or creative. Our great scholars like Adiśankaracharya, whose Advaita Vedanta, the top philosophy of the world even today, blends the two in a harmonious way. If one searches for such harmonious balance between theory and practice he find about 35 examples in Brahmasutra Bhashyam. Such great scholars are scholars among scholars and learned men among learned men, in their greatness. Śankaracharya in the said bhashya referred to such Lokanyaya in order to explain vedantic theories which are highly intangible. The modern pedagogy endorses that any abstract concept can be taught easily through examples from our everyday life.

Dr. Sukant Senapati whom I know from his [illegible] since I ½ decades has been studying Advaita Vedanta under Prof. V.Kuttumba Sastry, who is almost a twin to me. Dr. Senapati at present working with me in a big project 'Teach Sanskrit Through Sanskrit' and I am very happy that he has an excellent idea of putting together such Lokanyaya of a great scholar Adi Shankaracharya in a simple form so that both masses and elite will be delighted. I hope that Dr. Senapati will extend his study to all other works of Adi Shankracharya also in future.

I bless him that he should forward such creative works throughout his career.

Prof. Subbarayan Pen[illegible]
Coordinator
National Sanskrit P[illegible]

प्राक्कथनम्

संस्कृतवाङ्मये सन्ति अनेकानि अमूल्यानि तत्त्वानि। सागरस्य अन्तः गत्वा यथा तत्र विद्यमानानां रत्नानां ज्ञानं भवति, तथैव स्थिरमनसा संस्कृतवाङ्मयस्य आलोडनेन तत्र विद्यमानानां तत्त्वानां ज्ञानं भवति। संस्कृतवाङ्मये अद्वैतवेदान्तदर्शनं तत्त्वप्रतिपादनेन किमपि विशिष्टं स्थानं धरति। तत्रापि शङ्करभगवत्पादेन विरचितं प्रस्थानत्रयभाष्यम् अत्यन्तं विलक्षणमेव अस्ति। **'प्रसन्नगम्भीरं भाष्यम्'** इति सर्वतन्त्रस्वतन्त्रस्य वाचस्पतिमिश्रस्य उक्तिः यथार्था अस्ति। श्रीशङ्करभगवत्पादः सूक्ष्मतमम् अद्वैततत्त्वं सरसेन सरलेन रुच्युत्पादकेन लौकिकदृष्टान्तेन अबोधयत्। एतस्मिन् लघुकार्ये ब्रह्मसूत्रशाङ्करभाष्यस्य अधिकाधिकाः लोकन्यायाः सङ्कलिताः सन्ति। तत् तत् न्यायस्य सन्दर्भे भाष्यकारप्रयुक्तानां वाक्यानां सरलेन विश्लेषणं यथाशक्ति अहं कृतवान्। एतस्य निरूपणे न वैदुष्यं किञ्चित् प्रदर्शितमस्ति। अन्येषां जिज्ञासुच्छात्राणां तेषु तेषु शास्त्रेषु एवं भूतेषु रुचिपूर्णेषु कार्येषु प्रवृत्त्यर्थं कृतः एषः प्रयासः।

एषः प्रयासः सफलः वा न वा इति विषये विद्वांसः एव प्रमाणम्। एतस्मिन् प्रायः सर्वाणि पदानि विसन्धिकृतानि एव लिखितानि सन्ति। एतस्मिन् कार्ये प्रोत्साहनं दत्तवतां मम गुरुणां प्रो.वी.कुटुम्बशास्त्रिणां कृते आधमर्ण्यं प्रकटयामि। पुस्तकस्य स्वरुपसम्पादनाय यथोचित मार्गदर्शनं कृतवताम् अग्रजकल्पानां संयुक्तपरियोजना समन्वयकपदे विराजमानानां डॉ. वाई.एस.रमेश महोदयानां कृते कृतज्ञतां निवेदयामि। पुस्तकस्य अस्य आशंसनं विलिख्य माम् अनुगृहीतवतां राष्ट्रियपरियोजना समन्वयकपदे स्थितवतां गुरुकल्पानां प्रो. सुब्बरायन् पेरिमहोदयानां कृते मम नतनतिं समर्पयामि। एतस्य सर्वात्मसुन्दरता सम्पादनाय टंकणकार्यं सम्पादितवतः श्री अशोककुमार महोदयस्य कृते हार्दं धन्यवादं ज्ञापयामि।

अस्मिन् विद्यमानाः ये गुणाः ते मम गुरूणाम्। ये दोषाः ते सर्वे मम एव।

भवदीयः

सुकान्तः

विषयानुक्रमणिका

प्रास्ताविकम्	1–4
अन्धगोलाङ्गूलन्यायः	4–6
स्थूलारुन्धतीन्यायः	6–7
प्रधानमल्लनिर्वहणन्यायः	7–9
समुद्रतरङ्गन्यायः	9–10
स्थूणनिखननन्यायः	10–11
सोपानावरोहणन्यायः	11–12
पङ्कप्रक्षालनन्यायः	13–14
अहिकुण्डलन्यायः	14–15
विष्णुप्रतिमान्यायः	15–16
तत्क्रतुन्यायः	16–17
अन्तर्दीपिकान्यायः	17–18
छत्रिन्यायः	18–19
परिशेषन्यायः	19–20
इषुकारन्यायः	20–21
दशमस्त्वमसिन्यायः	21–22
गजान्धन्यायः	22–24
अर्धजरतीयन्यायः	24–25
बीजाङ्कुरन्यायः	25–26
स्वामीभृत्यन्यायः	26–27

शाङ्करनयेलौकिकन्यायाः

तन्तुपटन्यायः	27-28
अन्धपरम्परान्यायः	28-29
ब्राह्मणपरिव्राजकन्यायः	29-30
क्षीरोदकन्यायः	30-31
पञ्जरचालनन्यायः	31-33
काकदन्तपरीक्षणन्यायः	33-34
काकतालीयन्यायः	34-35
अनेकलोहादानन्यायः	35-36
लीलान्यायः	36-37
निकृष्टे उत्कृष्टदर्शनन्यायः	37
नरनगरन्यायः	38
कण्ठचामिकरन्यायः	38-39
द्विचन्द्रदर्शनन्यायः	40
आदर्शगतछायान्यायः	40-41
सन्दर्भग्रन्थसूची	42-43
न्यायानां वर्णानुक्रमणिका	44



॥ श्रीः॥

शाङ्करनये न्यायानां महत्त्वं प्रयोगश्च

अद्वैतवेदान्तदर्शने सन्ति अनेके आचार्याः। तेषु आचार्यशङ्करः अप्रतिमप्रतिभया प्रत्युत्पन्नमत्या सर्वेषु अपि विषयेषु अप्रतिहतगत्या इतरान् आचार्यश्रेष्ठान् अतिशेते। अद्वैतवेदान्त-दर्शनस्य मूलस्तम्भायमानानां दशोपनिषद्-गीता-ब्रह्मसूत्राणां ग्रन्थानां सर्वमनोभिरामं भाष्यम् आरच्य अद्वैतवेदान्तस्य तत्त्वं सुदृढं व्यवस्थाप्य श्रेयः प्राप्तवान्। आचार्यशङ्करेण श्रुति-स्मृति-न्यायप्रस्थानानामुपरि यद्भाष्यं रचितं तद् दर्शनप्रपञ्चे प्रस्थानत्रयनाम्ना प्रथितम् अभवत्। अनेन महात्मना रचितं भाष्यं न केवलं पारिभाषिकपदसंबलितं किन्तु अत्यन्तमनोहरं लोकप्रसिद्धोदाहरणयुक्तं लोकन्यायविभूषितं हृद्यं च अस्ति। शाङ्करभाष्यस्य शैली प्रसन्ना गम्भीरा मनोहारिणी च अस्ति।

शाङ्करसिद्धान्तस्य सुलभावगमाय न्यायस्य अत्यन्तावश्यकता वर्तते एव। न्यायशब्दस्य प्रयोगः आचार्यशङ्करेण विविधेषु अर्थेषु कृतः दृश्यते। न्यायशब्दस्य आदौ न्यायशास्त्रम् इत्यर्थं स्वीकुर्मः। यतः वेदान्तशास्त्रज्ञानां विषये इदमाभाणकमस्ति यत् न्यायशास्त्रज्ञानं विना यः केवलं वेदान्तशास्त्रस्य ज्ञाता भवति स अन्यायवेदान्ती इति। आस्तां, तावत् न्यायशब्दस्य

व्युत्पत्तिः संस्कृतवाङ्मये एवं दृश्यते यत् **नियमेन ईयते इति, अर्थात् निश्शेषेण ईयते विवक्षितार्थो येन स न्यायः।** अभीष्टार्थज्ञापकसाधनं न्यायः इति वक्तुं शक्यते। **एवञ्च सामान्यतः न्यायशब्दस्य युक्तिः, प्रसिद्धिः, तर्कः, नीतिः, व्युत्पत्तिः, शास्त्रम्, अवयवः** इत्यादिषु सन्दर्भेषु प्रयोगः उपलभ्यते। न्यायशास्त्रसन्दर्भे एवमुक्तं यत् 'प्रमाणैरर्थपरीक्षणं न्यायः' इति। वात्स्यायनभाष्ये न्यायशब्दस्य **सन्मार्गार्थे** प्रयोगः कृतः वर्तते। तद्यथा—

यान्ति न्यायप्रवृत्तस्य तिर्यञ्चोऽपि सहायताम्।
अपन्थानं तु गच्छन्तं सोदरोऽपि विमुञ्चति।।[१] **इति।**

महाभारते न्यायशब्दस्य प्रयोगः **नीत्यर्थे** वर्तते। तद्यथा— "**न्यायविद्धर्मतत्त्वज्ञः षडङ्गविदनुत्तमः**[२]" इति।। एषः न्यायशब्दः शाङ्करभाष्ये अनेकार्थेषु प्रयुक्तः अस्ति। स्थालीपुलाकन्यायेन ब्रह्मसूत्रशाङ्करभाष्ये प्रयुक्तानां लौकिकन्यायानां तत्र तत्र कथम् उपयोग इति विषये समासेन इह प्रतिपाद्यते।

ब्रह्मसूत्रशाङ्करभाष्ये न्यायशब्दः **औचित्यार्थे** प्रयुक्तः। यथा बालक्याधिकरणे "अथ यदुक्तं वाक्यशेषगताज्जीवलिङ्गान्मुख्य—प्राणलिङ्गाच्च तयोरेवान्यतरस्येह ग्रहणं न्याय्यं न परमेश्वरस्य[३]" इति एवमेव अन्यत्रापि— "अपि च क्वचिद् गौणः शब्दो दृष्टः

इति नैतावता शब्दप्रमाणकेऽर्थे गौणीकल्पना न्याय्या सर्वत्रानास्वासप्रसङ्गात्[४]।'' इति। न्यायशब्दस्य **औचित्यार्थे** प्रयोगस्य एष अपरः सन्दर्भः— ''श्रुतिलक्षणाविशये च श्रुतिर्न्याया न लक्षणा[५]'' इति। केनोपनिषदि न्यायशब्दस्य प्रयोगः **नियमार्थे** कृतः वर्तते। तद्यथा—''गुणवद्गुणवत्ता संसृज्यते नाऽतुल्यजातीयम्। अतः निर्गुणं निर्विशेषं सर्वलक्षणं केनचिदप्यतुल्यजातीयेन संसृज्यते इत्येतद् न्यायविरुद्धं भवेत्[६]'' इति।

आचार्यशङ्करः न्यायशब्दं क्वचित् **युक्त्यर्थे** प्रयुक्तवान्। तद्यथा— ''अभावश्च रथादीनां श्रूयते न्यायपूर्वकम्[७]'' गीतायाम् अपि अस्मिन् एव अर्थे न्यायशब्दः प्रयुक्तः। तद्यथा— ''अविद्या च सह कार्येण विद्यया हातव्या इति श्रुतिस्मृतिन्यायेभ्यः अवगम्यते[८]'' इति भाष्ये न्यायशब्दः क्वचित् विध्यर्थेऽपि प्रयुक्तः अस्ति। तद्यथा— ''एवं यथोक्तेन न्यायेनैतमेव आत्मानं विदित्वा यथा प्रकाशितं मुनिर्भवति[९]'' इति।

आचार्यशङ्करेण न्यायशब्दः क्वचित् **दृष्टान्तार्थे** प्रयुक्तः वर्तते। यथा— ''अतः संवेष्टितप्रसारितपटन्यायेनैवान्यत्कारणा—त्कार्यमित्यर्थः'' इति।

बृहदारण्यकोपनिषद्भाष्ये न्यायशब्दस्य निर्वचनम् आचार्यशङ्करेण एवमभिहितम्—

''यथा न्यायं यथा गतं निश्चित आयो न्यायः अयनमायो निर्गमनम्। पुनः पूर्वगमनवैपरीत्येन यदा गमनं स प्रतिन्यायः, यथा गतं पुनरागच्छतीति इत्यर्थः।''

एवञ्च आचार्यशङ्करस्य मतानुसारेण लोके शास्त्रे वा विद्यमानानां दुर्बोधविषयाणां येन सहजतया अवगमः भवति सः न्यायः इति वक्तुं शक्यते।

अन्धगोलाङ्गूलन्यायः

लोके विवेकहीनस्य आश्रयेण दुःखस्य अनुभवः भवतीति सन्दर्भे एतस्य न्यायस्य प्रयोगः क्रियते। यथा कश्चित् अन्धः स्वगृहं गन्तुम् इच्छति परं स्वयं मार्गं द्रष्टुं न शक्नोति, अतः सः कस्यचित् गोः पुच्छं गृह्णाति। परं स गौः तस्य स्वामिगृहं गच्छति। गोपुच्छं गृहीतवान् अन्धः स्वगृहप्राप्तिं विना अन्यस्य गृहं प्राप्य दुःखम् अनुभवति। अथवा कदाचित् वेगेन धावतः गोः पुच्छं हस्तात् प्रच्युतं भवति तदा अपि स अन्धः मध्यमार्गं स्थित्वा दुःखमनुभवति।

एवमेव शास्त्रेऽपि एतस्य न्यायस्य समन्वयनं दृश्यते। वेदान्तदर्शने चेतनः आत्मा भवति, परन्तु सांख्याः अचेतनं प्रधानम् आत्मा इति प्रतिपादयन्ति। अचेतनं न कदापि आत्मा भवितुमर्हति तदुक्तं भाष्ये— ''तत्त्वमसि श्वेतकेतो इति चेतनः

श्वेतकेतुः मोक्षयितव्यः[११]'' इति। तत्रैव पुनः उक्तं भाष्यकारेण यत् यदि शास्त्रप्रमाणं परित्यज्य अचेतना प्रकृतिः आत्मा इत्यङ्गीक्रियेत तर्हि अन्धगोलाङ्गूलन्यायवत् लक्ष्यस्य सिद्धिः न स्यात्।

(तदुक्तं भाष्यकारेण—''यदि च अज्ञस्य सतो मुमुक्षेर-चेतनात्मानमात्मेत्युपदिशेत्प्रमाणभूतं शास्त्रं स श्रद्दधानतयान्ध-गोलाङ्गूलन्यायेन तदात्मदृष्टिं न परित्यजेत्, तद्व्यतिरिक्तं चात्मानं न प्रतिपद्येत, तथा सति पुरुषार्थाद्विहन्येतानर्थं च ऋच्छेत्'' इति। अन्धगोलाङ्गूलन्यायेन अचेतनं प्रधानं न आत्मा इति निश्चयः।

आचार्य शङ्करः अचेतनम् आत्मा न भवति—इति बोधयितुं भाष्ये एतस्य न्यायस्य— उल्लेखं कृतवान्। एतस्मिन् सन्दर्भे प्रयुक्तानां भाष्यवाक्यनाम्—अयं सारः—" शास्त्रं चेतनम् उद्दिश्य मोक्षस्य उपदेशः कृतः अस्ति। तत्त्वमसि इति उपदेशः चेतनं श्वेतकेतुम्— उद्दिश्य कृतः। तस्य कृते एव मोक्षः देयः इति शास्त्रं प्रमाणयति। यदि शास्त्रप्रमाणं परित्यज्य अचेतना प्रकृति—आत्मा भवेत् तर्हि अन्धस्य गोपुच्छग्रहणवत् स्थिति भवेत् इति। अर्थात् अनात्मानम् आत्मा—इति निश्चित्य यदि कश्चित् प्रवर्तते तर्हि सः अवश्यं पुरूषार्थं न प्राप्नोति किन्तु अनर्थम् एव आप्नोति इति।

स्थूलारुन्धतीन्यायः

स्थूलविषयाणां बोधद्वारा यत्र सूक्ष्मतत्त्वानामवगाहनं भवति तत्र स्थूलारुन्धतीन्यायस्य प्रयोगः क्रियते लोके नक्षत्रमण्डलस्य परिचयं विना सूक्ष्मस्वरूपस्यं सप्तर्षिमण्डलस्थस्य अरुन्धतीनक्षत्रस्य परिचयः अववोधनं वा न सम्भवति। अतः अरुन्धती दिदृक्षवम् उद्दिश्य आदौ स्थलूस्वरूपाणां नक्षत्राणां क्रमेण इयम् अरुन्धती इति परिचयः कार्यते। ततः पूर्वम् स्थूलनक्षत्रेषु उत्पन्नायाः बुद्धेः उत्तरोत्तरं निराकरणं क्रियते। परिशेषे वास्तविकअरुन्धतीनक्षत्रस्य परिचयः कार्यते। एवं प्रथमतः स्थूलनक्षत्रादिषु अरुन्धतीबुद्धिम् उत्पाद्य अन्ते स्थूलारुन्धतीबुद्धेः निराकरणेन तत्त्वतः विद्यमानस्य सूक्ष्मारुन्धतीनक्षत्रस्य बोधः—जायते।

ब्रह्मसूत्रशाङ्करभाष्ये आचार्यशङ्करेण एतस्य न्यायस्य उपयोगः कृतः अस्ति। वेदान्तदर्शनानुसारेण आत्मतत्त्वं सूक्ष्मतमं मनसा अचिन्त्यं दुर्बोध्यं च अस्ति। तादृशस्य तत्त्वस्य सुलभतया अनवगतस्य सूक्ष्मतमस्य आत्मतत्त्वस्य आत्मबुभुत्सुं प्रति बोधयितुं स्थूलारुन्धतीदर्शनन्यायः भाष्ये प्रदर्शितः। तद्यथा— "अरुन्धतीं दिदर्शयिषुस्तत्समीपस्थां स्थूलां तारामुख्यां प्रथममरुन्धति इति ग्राहयित्वा तां प्रत्याख्याय पश्चादरुन्धतीमेव ग्राहयति तद्वत् अनात्मानम् आत्मत्वेन ग्राहयित्वा पश्चात् नायमात्मेति ब्रूयात्।[१२] इति।

स्थूलारून्धती न्यायः स्थूलतः सूक्ष्मतत्त्वस्य अवगमनार्थ उपकारकः भवति। अरून्धती महर्षि वशिष्ठस्य पत्नी अस्ति। सप्तर्षिमण्डले स्थितेषु नक्षत्रेषु अतिसूक्ष्मनक्षत्रं भवति। एतत्सन्दर्भे उल्लिखितस्य भाष्यवाक्यस्य— अयं सारः— अतिसूक्ष्मस्य अरून्धतीनक्षत्रस्य परिचयप्रदानाय प्रथमं स्थूलं एकैकं नक्षत्रं प्रदर्श्य इयम्—अरून्धती इति बोधनम्। एवं क्रमेण पूर्वम् अमुख्यं नक्षत्रम् अरून्धतीनक्षत्ररूपेण प्रदर्श्य उत्तरोत्तरं न इयम्—अरून्धती इति निराकृत्य अन्ते सत्यस्य अतिसूक्ष्मस्य अरून्धतीनक्षत्रस्य बोधनम् इति।

प्रधानमल्लनिर्वहणन्यायः

एष न्यायः अतीव रमणीयः अस्ति। लोके प्रमुखस्य/ पराजये तत्सम्बन्धीनाम् अपि पराजयः निश्चित यत्र भवति तत्र एतस्य प्रधानमल्लनिर्बहणन्यायस्य उपयोगः भवति। यथा कदाचित् युद्धार्थं समूहद्वयं सिद्धं भवति। तस्य समूहद्वयस्य युद्धम् अपि भवति। तस्मिन् युद्धे यस्य समूहस्य प्रधानयोद्धा पराजितो भवति तस्य समूहस्य पराजयः निश्चियते, पुनः पराजयसमूहे विद्यमानैः सर्वैः सह युद्धस्य अपेक्षा न भवति।

अस्य न्यायस्य प्रचलनं शास्त्रेऽपि वर्तते। अद्वैतवेदान्तदर्शने कार्यजगतः कारणं चेतनं ब्रह्म इति उक्तम्। किन्तु एतत् कार्यकारणविषये अचेतनकारणवादिनः सांख्याः प्रधान—

प्रतिपक्षभूताः। अतः तन्मतं शाङ्करभाष्ये असकृत् निराकृतम्। प्रधानविरोधीपक्षस्य सांख्यस्य मतनिराकरणेन अन्यानि मतानि निराकृतानि एव इति आशयः। तदुक्तं भाष्यकारेण— "यथा देवलप्रभृतिभिश्च कैश्चिद्धर्मसूत्रकारैः स्वग्रन्थेष्वाश्रितः, तेन तत्प्रतिषेधे यत्नोऽतीव कृतो नाण्वादिकारणवादप्रतिषेधे। तेऽपि तु ब्रह्मकारणवादपक्षस्य प्रतिपक्षत्वात्प्रतिषेद्धव्याः। तेषामुपोद्बलकं वैदिकं किञ्चिल्लिङ्गमापातेन मन्दमतीन्प्रति भायात्। अतः प्रधानमल्लनिर्बहण न्यायेनादिशति—एतेन प्रधानकारणवादप्रतिषेधन्यायकलापेन सर्वेऽण्वादिकारणवादा अपि प्रतिषिद्धतया व्याख्याताः" इति।। शिष्टपरिग्रहाधिकरणेऽपि एतस्य न्यायस्य उल्लेख कृतः वर्तते।

प्रधानं नाम प्रमुखभूतः, नेता वा, प्रधानस्य मल्लास्य पराजयः प्रधानमल्लनिर्बहणः इति— उच्यते। अचेतनं प्रधानम् आत्मा इति सांख्यानाम् आग्रहः। सः एव अद्वैतमतस्य प्रधानभूतः प्रतिपक्षः तस्य मतस्य निराकरणम् अद्वैतवेदान्ते आचार्य—शङ्करेण श्रुति—स्मृति—न्यायेनच। अनेकवारं कृतम्। अतः प्रमुखभूतस्य सांख्यस्य अचेतन आत्मवादस्य निराकरणेन अन्येषां मतानि—अपि निराकृतानि भवन्ति। एतस्य न्यायस्य सन्दर्भे उल्लिखितस्य भाष्यवाक्यस्य— अयं सारः— यथा देवलप्रभृतीभिः धर्मसूत्रकारैः स्वसिद्धान्तस्य द्राढ्याय परमतस्य

निराकरणसमये प्रधानभूतस्य प्रतिपक्षस्य निराकरणं स्वग्रन्थेषु कृतः न पुनः अन्येषाम् अप्रधानभूतानां मतानां निराकरणं कृतम्, तथा– एव आचार्यशङ्करेण प्रधानभूतस्य सांख्यस्य अचेतनवादस्य निराकरणं कृतं न पुनः अप्रधानभूतानाम् अण्वादिवादानाम्–इति।

समुद्रतरङ्गन्यायः

अभेदतत्त्वबोधनप्रसङ्गे अस्य न्यायस्य उपयोगः लोके क्रियते। एतस्य न्यायस्य स्वरूपम् एवम् अस्ति यत्– यथा समुद्रात् उत्पन्नाः फेन–विचि–तरङ्ग बुद्बुदादयः अनेकेषु नामसु व्यवह्रियन्ते परं तत्वतः ते समुद्रापेक्षया भिन्नाः न भवन्ति।

अद्वैतवेदान्तदर्शने कार्यं कारणात् अभिन्नम् इति तत्वस्य बोधनाय समुद्रतरङ्गन्यायः प्रदर्शितः। अद्वैतवेदान्तमतानुसारेण "सर्वं खलु इदं ब्रह्म" "ब्रह्मैवेदं सर्वम्" इति श्रुत्युक्तं तत्त्वमेव परमं तत्त्वम् इति निश्चितम्। कार्यरूपेण परिदृश्यमानं जगदिदं ब्रह्मणः विवर्तरूपम्। जगत् नाम ब्रह्मभिन्नं किञ्चित् तत्त्वान्तरम् एव नास्ति इति। परं ब्रह्मभिन्नतया यदयं जगतः अनुभवः स समुद्रतरङ्गन्यायेन इति भाष्यकृदाशयः। तदुक्तं भाष्ये– "अतः परमकारणाद्– ब्रह्मणोऽनन्यत्वेऽप्युपद्यते भोक्तृभोग्यलक्षणो विभागः समुद्रतरङ्गादिन्यायेन"[१४] इति।

कार्यं कारणात् तत्त्वतः न भिन्नम् इति तत्त्वं बोधयितुम्—एतस्य न्यायस्य उल्लेखो भाष्ये कृतः। एतस्मिन् सन्दर्भे उल्लिखितस्य भाष्यवाक्यस्य—अयं सारः—जगतः उत्पति—स्थिति—लय कारणं ब्रह्म इति अद्वैतवादस्य मतम्। "सर्वंखल्विदंब्रह्म" इति श्रुतिः एतस्य तत्त्वस्य उपोद्बलकम्। यद्यपि जीवः ब्रह्मणः अपेक्षया न भिन्नः तथापि समुद्रतरङ्गन्यायेन भोक्तृ—भोग्य विभागः न विरूध्यते। यथा समुद्रे स्थितं जलं स्वरूपमतः फेनः—तरङ्ग बुद्बुदुना सह अभिन्नं तथा फेनः—तरङ्ग बुद्—बुदः इत्यादि भेदव्यवहारः तां तां क्रियां परिलक्ष्य भवति—एव एवमेव कारणात् ब्रह्मणः कार्याणि न भिन्नानि यद्यपि तथापि उपाधिसम्बधात् अयंकर्त्ता, भोक्ता इति विभागः अस्ति इति।

स्थूणनिखननन्यायः

एतस्य न्यायस्य प्रयोगः दृढ़स्य अधिकद्राढ्याय भवति। लोके यथा कस्यचित् स्तम्भस्य भूमौ स्थापनवेलायां भूमिं खनित्वा स स्तम्भः व्यवस्थाप्यते। ततः तस्य पौनःपुण्येन कम्पनादि प्रक्रियया द्राढ्यं सम्पाद्यते। एषैव स्थूणनिखननन्यायः इति कथ्यते।

शास्त्रेऽपि अस्य न्यायस्य प्रयोगः भवति। यथा

ब्रह्मसूत्रशाङ्करभाष्ये'' जन्माद्यस्य यतः'' इति सूत्रेण ''यतो वा इमानि भूतानि जायन्ते'' इत्यादि श्रुत्या ब्रह्म जगत्कारणम् इति प्रतिपादितं तथापि तस्यैव तत्वस्य प्रतिपादनं शास्त्रयोनित्वाधिकरणे ईक्षत्यधिकरणे, आरम्भणादि अधिकरणेषु च कृतम्। अत्र एकस्य तत्त्वस्य पौनःपुण्येन तत्र तत्र प्रतिपादनं स्थूणनिखननन्यायेन अभवत् इति अवगन्तव्यः। तदुक्तं भाष्यकारेण—''पुनश्च जगज्जन्मादिहेतुत्व— मीश्वरस्याक्षिप्यते। प्रतिज्ञातस्यार्थस्य दृढीकरणाय''[१५] इति।

दृढस्य दृढीकरणाय एतस्य न्यायस्य उल्लेखः भाष्ये कृतः। एतस्य सन्दर्भे प्रयुक्तस्य भाष्यवाक्यस्य—अयं सारः। जगतः जन्म—स्थिति—लयस्य कारणम् ईश्वरः इति यद्यपि श्रुतिप्रमाणेन निश्चितः तथापि निश्चितस्य तत्त्वस्य अधिकदृढतासम्पादनाय स्थूणनिखननन्यायः दृष्टान्तःभवति, इति।

सोपानावरोहणन्यायः

एष न्यायः अत्यन्त सरलः सुगमः च अस्ति। लोके एष अनुभव यत् कस्यचित् हर्म्यस्य उपरि गन्तुं येन क्रमेण सोपानानाम् आरोहणं भवति तद्विपरीतक्रमेण अवरोहणमपि। एषैव सोपानावरोहणन्यायः इति उच्यते। अद्वैतवेदान्तशास्त्रे एतस्य न्यायस्य प्रयोगः कृतः वर्तते। भूतानां यो लयक्रमः अद्वैतवेदान्तदर्शनेऽवगतः स सोपानावरोहणन्यायवद्भवति। श्रुतौ

अपि स एव क्रमः वर्णितः अस्ति यथा– ''तस्माद्वा एतस्मादात्मनाकाशसम्भूतः आकाशाद्वायुः वायोरग्निः''[१६] इत्यादि।

आचार्यशङ्करेण भाष्ये एवमप्युक्तम्– ''तथाहि लोके दृश्यते येन क्रमेण सोपानमारुढ़स्ततो विपरीतेन क्रमेणावरोहतीति। अपि च दृश्यते मृदो जातं घटशरावाद्यप्ययकाले मृद्भावमप्येत्यद्भ्यश्च जातं हिमकरकाद्यब्भावमप्येतीति[१७]''।

सोपानं नाम आरोहणाय साधनविशेषः अवरोहण नाम उपरिष्ठात् अधः आगमनम्। पञ्चभूतानां यः लयक्रमः अद्वैतवेदान्ते निश्चितः सः सोपानवरोहणक्रमेण भवति। अतः भाष्ये एतस्य न्यायस्य–उल्लेखः कृतः। एतस्य सन्दर्भे उल्लिखितस्य भाष्यवाक्यस्य–अयं सारः– यथा लोके एषः अनुभवः यत् येन क्रमेण सोपानानाम् आरोहणं भवति ततः विपरीतक्रमेण अवरोहणम् अपि। एवम् एव मृदः उत्पन्नाः घटशरावादयः येन क्रमेण उत्पद्यन्ते ततः विपरीतक्रमेण पुनः मृदि लयतां गच्छन्ति। यथा वा हिम–करकादयः अप्सुलयतां गच्छन्ति–इति।

पङ्कप्रक्षालनन्यायः

पङ्के हस्तप्रक्षालनापेक्षया अक्षालनं वरम् इति लोके उच्यते स्ववचनस्य कथने यत्र स्वस्य पराजयः सम्भाव्यते तत्र तदकथनमेव श्रेयस्करं भवतीति। एतादृशस्य सन्दर्भस्य प्रसङ्गे लोके पङ्कप्रक्षालन न्यायस्य व्यवहारः क्रियते।

श्रुतितत्त्वप्रतिपादनाय प्रवृत्तम् अद्वैतवेदान्तदर्शनं "सत्यं ज्ञानमनन्तं ब्रह्म" ब्रह्मविदाप्नेति परम्" इत्यादिभिः श्रुतिवाक्यैः ब्रह्मणः सत्ता बोध्यते। नेति श्रुतिस्तु ब्रह्मणः सत्तां न निषेधति, किन्तु ब्रह्मणि कल्पितानि अनेकरूपाणि वारयति। यदि नेति नेति श्रुत्या ब्रह्मसत्ता वार्येत तर्हि पङ्कप्रक्षालनन्यायवत् अत्र व्यवहारः स्यात्। परं न तथा अनेन श्रूतिवाक्येन प्रतिपादयितुं शक्यते, यतः सर्वाः श्रुतयः ऐक्यकण्ठेन ब्रह्मणः सत्तामेव बोधयन्ति। एतत्सन्दर्भे उक्तं च भाष्यकारेण– "कथं हि शास्त्रं स्वयमेव ब्रह्मणो रूपद्वयं दर्शयित्वा स्वयम् एव पुनः प्रतिषेधति प्रक्षालनाद्धिपङ्कस्य दूरादस्पर्शनं वरम्"[१८] इति।

श्रुतिवाक्यानि ब्रह्मणः सत्तां न वारयन्ति किन्तु ब्रह्मणि अनेकरूपतां वारयन्ति इति सन्दर्भे एतस्य न्यायस्य–उल्लेखः भाष्ये कृतः। अत्र भाष्यवाक्यस्य अयं सारः–श्रुति शास्त्रं नाम, उपनिषद् वाक्यानि स्वयमेव ब्रह्मणः रूपद्वयम् अस्ति

इति प्रतिपादयन्ति। केन वा हेतुना श्रुतिवाक्यानि पुनः तस्य प्रतिषेधं कुर्वन्ति, यदि—एवं तर्हि पङ्केप्रवेशस्य का आवश्यकता का पुनः तस्य पङ्कप्रक्षालनस्य अपेक्षा इति। एतत् सर्वमकरणम्—एव वरम् इति।

अहिकुण्डलिन्यायः

एकस्य वस्तुनः यत्र अवस्थाभेदेन भेदः अभेदरूपेण च अनुभव जायते तत्र अहिकुण्डलन्यायस्य प्रयोगः लोके भवति। यथा सर्पः यदा ऋजुरूपेण तिष्ठति तदा तस्य आकारः दीर्घः भवति। यदा तु स एव सर्पः कुण्डलाकारेण तिष्ठति तदा तस्याकारे भिन्नता परिलक्ष्यते। एवं च यत्र एकस्यैव भेद अभेद इति रूपद्वयं अवगम्यते तत्र अहिकुण्डलिन्यायस्य अपेक्षा भवति। एतस्य न्यायस्य प्रयोगः शास्त्रेऽपि कृतो दृश्यते।

शाङ्करवेदान्तदर्शने एकमेवाद्वितीयं ब्रह्म यद्यपि श्रुतिसिद्धं तदेव तत्त्वं च, तथापि व्यवहाराय एकस्य एव ब्रह्मणः उपाधिसम्बन्धम्—आदाय अनेकत्वम् उच्यते। तदुक्तं भाष्ये—"अत उभयव्यपदेशदर्शनादहिकुण्डलवद्वत्र तत्त्वं भवितुमर्हति। यथाहिस्त्यिभेदः कुण्डलाभोगाप्रांशुत्वादीनीति तु भेदे एवमिहापि[१९]" इति।

स्वरूपतः एकरूपेण विद्यमानस्य वस्तुनः उपाधि सम्बन्ध—

कारणात् अनेकता प्रदर्शनाय एतस्य न्यायस्य—उल्लेखः भाष्ये कृतः। एतत्सन्दर्भे प्रयुक्तस्य भाष्यवाक्यस्य अयं सारः—अद्वैतवेदान्तसिद्धान्तानुसारम् "एकमेवाद्वितीयं ब्रह्म" यद्यपि सिद्धम्, तथापि अविद्या, अन्तःकरणादि उपाधिसम्बन्धात् तस्य अनेकतारूपेण व्यपदेश—भवति। यथा सर्पः सर्पाकारेण एकः एव, किन्तु यदा कुण्डलः फणः, प्रांशु रूपेण भवति सर्पः तदा तस्य अनेकताव्यवहारः उपपद्यते इति।

विष्णुप्रतिमा न्यायः

एकस्मिन् वस्तुनि अन्यस्य कल्पना यत्र क्रियते तत्र विष्णुप्रतिमान्यायः भवति। यथा लोके शालग्रामपाषाणे हरिबुद्धिम् आरोप्य अर्च्चनादिकं क्रियते। एवमेव शास्त्रेऽपि अस्य न्यायस्य उपयोगः कृतः वर्तते। अद्वैतवेदान्तदर्शने अनेकवारम् एतस्य न्यायस्य प्रयोगः कृतः। अद्वैतवादे एकमेवाद्वितीयं निर्विकारं ब्रह्म अङ्गीकृतम् अस्ति। परन्तु सविशेषबोधिकानां श्रुतीनां समन्वयार्थम्—अद्वितीयेऽपि ब्रह्मणि रूपभेदः कल्प्यते। तदुक्तं शाङ्करभाष्ये— "प्रतीकदर्शनमिदं विष्णुप्रतिमान्यायेन भविष्यति[२०]" इति।

सुलभेन अवगमार्थम् उपासनार्थं वा विष्णुप्रतिमान्यायः अत्यन्त—उपकारकः—भवति। प्रतिमा नाम विग्रहः मूर्त्तिः इति

अर्थः। सूक्ष्मस्य अदृश्य—स्वरूपस्य देवस्य उपासनायाः कृते स्थूले पषाणविशेषे तस्य स्वरूपम् आरोप्य तस्मिन् पाषाणविशेषे विष्णुः—इति भावनायाः सम्पादनम्। यथा शालग्रामे हरिबुद्धिः। एतत्सन्दर्भे भाष्ये प्रयुक्तस्य वाक्यस्य—

एकमेव—अद्वितीयस्य अयं सारः—ब्रह्मणः उपासकानां सुखाय प्रतीकदर्शनं विष्णुप्रतिमान्यायेन परिकल्पना कर्तुं शक्यते इति।

तत्क्रतुन्यायः

कर्मानुगुणं फलस्यप्राप्तिः यत्र भवति तत्र तत्क्रतुन्यायः भवति। यथा यागस्य अनुष्ठानेन फलप्राप्तिः। तत्क्रतुन्यायस्य प्रयोगः ब्रह्मसूत्रशाङ्करभाष्ये आचार्यशङ्करः अनेकवारम् अकरोत्।

ब्रह्मणः सङ्कल्पं यः श्रद्धया करोति स ब्रह्मप्राप्नोति इति विषयस्य अवगमनार्थं तत्क्रतुन्यायस्य उपयोगः कृतः भाष्ये। तद्यथा— "तत्क्रतुन्यायेन ब्रह्मक्रतुनामेव तत्प्राप्तिर्नेतरेषामिति गम्यते[२१]" गीतायाम् अपि फलस्य प्राप्तिः तत्क्रतुन्यायेन जायते इति भगवता गीताचार्येण प्रतिपादितम्। तद्यथा— "ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्[२२]। इति।

क्रतुशब्दस्य फलम्—इति—अर्थः। कम्—अपि प्रधानं लक्ष्यम् उद्दिश्य निष्ठया कृतस्य कर्मणः अनुगुणं फलस्य

प्राप्ति: यत्र भवति तत्र तत्क्रतुन्यायस्य अपेक्षा अस्ति इति। एतत्सन्दर्भे प्रयुक्तस्य भाष्यवाक्यस्य—अयं सार: यथा कश्चित् यदि निष्ठया विष्णो: उपासनां करोति तस्य तत् फलं मिलति तथैव य: निष्ठया ब्रह्म—उपासनां करोति तस्य ब्रह्म— अवाप्ति: भवति इति। अस्मिन् सन्दर्भे भगवान् गीताचार्य अपि एवम्—उक्तवान् यत् य: मां यथा यथा उपासनां करोति तस्य कृते अहं तथा तथा फलं ददामि इति।

अन्तर्दीपिकान्याय:

अनेकप्रयोजनसिद्धि: यत्र उद्देश्यं भवति तत्र अन्तर्दीपिकान्यायस्य उपयोग: क्रियते। अस्य अयमर्थ: यत् दीप: गृहस्य अन्त: तादृशे स्थाने स्थापनीय: येन समसमयं प्रकोष्ठद्वयं ततोऽधिकं वा प्रकाशयेत्।

आचार्यशङ्कर: स्वभाष्ये एतस्य न्यायस्य प्रयोगं कृतवान्। यथा— ''नित्यं सर्वदा, नित्यं सत्येन, नित्यं तपसा, नित्यं सम्यग्ज्ञानेन, इति सर्वत्र नित्यशब्द: अन्तदीपिकान्यायेन अनुषक्तव्य:[२३]'' इति। एवञ्च प्रकृते प्रयुक्त: नित्यशब्द: अनेकानि प्रयोजनानि साधयति।

एकेन साधनेन यत्र अनेकानां प्रयोजनानां सिद्धि:—भवति तत्र अन्तर्दीपिकान्यायस्य अपेक्षा अस्ति। भाष्ये एतस्य

न्यायस्य—उल्लेख कृतः। एतत्सन्दर्भे प्रयुक्तस्य भाष्यवाक्यस्य—अयं सारः—ब्रह्म सर्वदा **नित्यं, नित्यं सत्यम्, नित्यं सम्यक्ज्ञानस्वरूपम्** इति बोधयितुं सर्वत्र नित्यम् इति विशेषणस्य प्रयोगः भाष्ये कृतः। परन्तु अत्र 'नित्यं' इति एकम् एव विशेषणम् अनेक प्रयोजनानि अनेकानि वस्तुनि प्रकाशयति तद्वत् **नित्यम्** पदं बोधयति इति।

छत्रिन्यायः

एकस्य गुणेन दोषेण वा संसर्गात् यत्र समूहस्य गुणदोषादीनां निर्णयः भवति तत्र छत्रिन्यायः भवति। एकः समूहः कुत्रचित् गच्छति स्म। परं समूहे विद्यमानेषु पुरुषेषु एकस्य एव हस्ते छत्रम् आसीत्, यदा त समूहं परिलक्ष्य के गच्छन्ति इति प्रश्नः क्रियते तदा समाधानं छत्रिणो यान्ति इति कथयन्ति जनाः। यद्यपि एकस्येव समीपे छत्रमासीत् न सर्वेषां तथापि समूहस्य छत्रिणो यान्ति इति व्यवहारः भवति एव।

एवं न्यायस्य अस्य प्रयोगः अद्वैतवेदान्तसिद्धान्ते आचार्यशङ्करेण कृतः अस्ति। यथा कठोपनिषदभाष्ये आचार्यशङ्करः छत्रिन्यायस्य समन्वयम् एवं प्रदर्शयति 'ऋतं पिबन्तौ' इति मन्त्रे कर्मफलं पिबन्तौ इति उक्तम्। तत्र एकः कर्मफलं पिबति भुङ्क्ते नेतरः तथापि पातृसम्बन्धात् पिबन्तौ इत्युच्यते छत्रिन्यायेन[२४]'' इति। एवमेव ब्रह्मसूत्रे

भाष्यकारेणोक्तम्— "ऋतं पिबन्तौ इत्यत्र तु जीवे पिबत्यशनायाद्यतीति परमात्मापि साहचर्याच्छत्रिन्यायेन पिबतीत्युपचर्यते[२५]" इति।

एकस्य सम्बन्धस्य कारणात् समूहस्य निर्णयः यत्र भवति तत्र छत्रिन्यायः उपकरोति। छत्रम् नाम वर्षातः आतपतः रक्षणाय साधनमम्। छत्रम् अस्य अस्ति इति छत्रि। यस्य छत्रम् अस्ति स छत्रि इति अर्थः। छत्रिन्यायस्य—उल्लेखः भाष्ये कृत अस्ति। एतत्सन्दर्भे प्रयुक्तस्य भाष्यवाक्यस्य अयं सारः— अद्वैतवेदान्तसिद्धान्तस्य अनुसारेण जीवः कर्त्ता भोक्ता द्रष्टा भवति ब्रह्म न कर्त्ता, न भोक्ता नापि द्रष्टा भवति। परन्तु तत्त्वमस्यादि महावाक्यद्वारा जीवः ब्रह्मणः अपेक्षया न भिन्नः यद्यपि कर्मफलं जीवः भुङ्क्ते अशना पिपासा—रहितं ब्रह्म भवति तथापि साहचर्य कारणात् ब्रह्म पिबति इति व्यवहारः भवति। यथा छत्रिसम्बन्धात् अछत्रिणां यान्ति इति व्यवहारः भवति तद्वत् ब्रह्मणः कर्मफलभोगविषये इति।

परिशेषन्यायः

सम्भावितेषु अनेकेषु विषयेषु यत्र अवशेषस्य कस्यचित् एकस्य निर्णयः भवति तत्र परिशेषन्यायः इत्युच्यते। यथा कक्षायां पञ्चबालकाः सन्ति। तेषां नामानि क्रमेण राम—श्याम—रमेश—उमेशः—गोविन्दाः इति। तेषु क्रमेण चत्वारः

कक्षां प्रति आगताः परिशेषन्यायेन गोविन्दः न आगतः इति निर्णीयते। आत्मास्तित्वविचारप्रसङ्गे आचार्यशङ्करः एतस्य न्यायस्य प्रयोगं कृतवान्। तद्यथा पारिशेष्याद्यस्योपलब्ध्युरुपलब्धव्य यथा एतस्य हृदयमनोरूपस्य करणस्य वृत्तयो वक्ष्यमाणाः। इति।

इषुकारन्यायः

एकाग्रनिष्ठया यत्र लक्ष्यभूतस्य विषयस्य सिद्धिः भवति तत्र इषुकारन्यायः भवति। यथा द्रौपदीस्वयंवरस्य सन्दर्भे अर्जुनः तदेकनिष्ठया मत्स्यस्य अक्षिवेधं कृतवान्। अर्थात् तस्य दृष्टिः स्वलक्ष्यभिन्ने अन्यत्र न आसीत् इति।

अद्वैतवेदान्ते आचार्यशङ्करः इषुकारन्यायस्य अन्वयनं भाष्ये कृतवान्। तद्यथा जीवस्य मुग्धावस्थायाः विचारसन्दर्भे एवमुक्तं यत् "स्यादेतत् इषुकारन्यायेन मुग्धो भविष्यति। यथेषुकारो जाग्रदपीष्वासक्तमनस्तया नान्यान्बिषयानीक्षत[२६]" इति। सिद्धान्ती दृष्टया मुग्धावस्थाजीवस्य या भवति सा जाग्रत सुषुप्ति अवस्थयोः मध्यावस्था भवति। एषैव अवस्था भाष्यकारेण अर्धसम्पत्ति पदेन स्पष्टी कृता।

इषुकारः नाम व्याधः। यः आखेटं कृत्वा स्वजीविकां करोति। इषुकारः तदेकध्यानेन, एकाग्रमनसा स्व कार्यस्य साधनं करोति न कदाचित्—अपि तस्य लक्ष्यस्य च्यूतिः भवति।

एतस्य न्यायस्य—उल्लेखः भाष्ये कृतः—वर्तते। एतत्सन्दर्भे प्रयुक्तस्य भाष्यवाक्यस्य अयं सारः— जीवस्य मुग्धावस्थायाः विचारसमये आचार्यशङ्करः एवम्—उक्तवान् यत् इषुकारन्यायवत् जीवस्य मुग्धा—अवस्था भवेत्। यथा इषुकारः जागरण—अवस्थायां तिष्ठन् अपि बाणे दत्तमनः सन् स्वलक्ष्यभिन्नान् विषयान् न पश्यति तथैव जीवः जागरण अवस्थायां स्थित्वा अपि अन्यत् किमपि न पश्यति—इति।

दशमस्त्वमसि—न्यायः

एतस्य न्यायस्य प्रयोगः भ्रमनिवृत्ति प्रसङ्गे कृत अस्ति। एष न्यायः कस्याश्चित् आख्यायिकायाः आधारिता वर्तते। कदाचित् दशजनाः क्वचित् व्यापारार्थं गताः। तेषां गमनमार्गे काचित् नदी आगता। सर्वे तां नदीं सन्तीर्य अपरं पारं गतवन्तः। तत्र सर्वे समागताः सन्ति वा न वा इति ज्ञानाय तेषु कश्चित् गणनाम् अकरोत्। आत्मानं परित्यज्य सः नव जनान् गणितवान्, एकः तेषु नष्टः इति विचिन्त्य सर्वे दुःखाकुलाः सन्तः रोदनं कृतवन्तः। तदा तन्मार्गे अपरः कश्चित् रुदतः जनान् दृष्टवान् पृष्टवान् च तेषां दुःखकारणम्। ततः सः एकैकं पुरुषं गणयति स्म। अन्ते सर्वे सन्ति इति निरूपितवान्। तेन तेषां दुःखम् अपगतम्।

अद्वैतवेदान्तदर्शने एतस्य न्यायस्य उपयोगं आचार्यशङ्करः कृतवान्। भ्रमनिवृत्त्यर्थं वेदान्ते न्यायस्य अस्य प्रयोगः दृश्यते। तद्यथा— ''अविद्याध्यारोपितदुःखित्वभ्रमापोहार्थत्वात् आत्मनि प्रकृतसंख्यापुरणभ्रमापोहवत्[२७]'' इति।

दशमःत्वम् असि। नाम दशमसंख्यायाः पूरणं त्वया भवति इति। भ्रमनिराकरणसन्दर्भे भाष्ये एतस्य न्यायस्य—उल्लेखः कृतः। एतत्सन्दर्भे प्रयुक्तस्य भाष्यवाक्यस्य— अयं सारः— वेदान्तानुसारम् आत्मा नित्यशुद्धं भवति। परन्तु रज्जुसर्पदृष्टान्तेन आत्मनि अविद्या आरोपिता भवति। तेन अविद्या—आरोप कारणेन आत्मनि सुख—दुःखादि—अनुभवः भवति। तस्य भ्रमस्य निराकरणं स्वस्मिन् दशमसंख्यापुरणेन यथा दशत्वभ्रमस्य निराकरणं भवति तथा एव आत्मनि सुखदुःखादि भ्रमस्य निराकरणम्—इति।

गजान्धन्यायः

स्वरूपतः एकरूपेणविद्यमानस्य वस्तुनः अज्ञानकारणात् यत्र अनेकधावर्णनं क्रियते तत्र गजान्धन्यायस्य उपयोगः भवति। एषः न्यायः लोककथाधारितः अस्ति। क्वचित् चत्वारो अन्धाः निवसन्ति स्म। ते परस्परं दुराभिमानेन आत्मानं ज्ञानवन्तरूपेण भावयन्ति स्म। तेषां अहङ्कारस्य नाशार्थं एकदा काचित् परीक्षा

कृता। सा च परीक्षा एवं भूता आसीत्, यत् गजः कथंकारः इति यः भवत्सु वदति स एव ज्ञानवान् इति निर्णयः भविष्यति। ते चत्वारः गजस्य समीपं गताः। एकः गजस्य शुण्डं गृहीत्वा गजः सर्पाकारः इति, अपरः गजस्य पादं परामृश्य गजः वृक्षाकारः इति। अन्यः पुच्छं गृहीत्वा गजः रज्जुसदृशः इति, अन्तिमः गजस्य शरीरं परामृश्य गजः कुडयाकारः इति समाधानम् अवदत्। एतत्सर्वमपि समाधानं मिथ्यारूपम् अभवत्।

एवमेव अद्वैतवेदान्तदर्शने श्रुतिस्मृतिप्रसिद्धम् एकमेव आत्मानम् अज्ञानकारणात् आत्मनि अनेकताम् अनुभवन्ति जनाः। तदुक्तम् आचार्यशङ्करेण– "एकस्येव आत्मतत्त्वस्य अनेकता कल्पना गजदर्शनन्यायतुल्यः[२८]" इति।

स्वस्य अज्ञानस्य कारणात् यत्र एकस्य एव वस्तुनः अनेक–आकारेण वर्णनं भवति तत्र गजान्धन्यायः सहायकः–भवति। एतत्सन्दर्भे उल्लिखितस्य भाष्यवाक्यस्य– अयं सारः–"एकमेव–अद्वितीयं" इति श्रुति प्रामाण्यात् ब्रह्म एकमेव इति वेदान्तसिद्धान्ते निश्चितम्। किन्तु अविद्याकारणतः एकमेव ब्रह्म जना अनेकप्रकारतया वर्णयन्ति। यथा अन्धाः गजस्य वास्तविकं रूवरूपम् अज्ञात्व। अन्यथा वर्णनं कृतवन्तः तथा ब्रह्मणः वास्तविकं स्वरूपं न ज्ञात्वा अनेकप्रकारतया वर्णनां जनाः कुर्वन्ति इति।

अर्धजरतीयन्यायः

स्वाभीष्टवस्तुनः सिद्ध्यर्थम् अपेक्षित—अंशमात्रं गृहीत्वा अवशिष्टांशानां यत्र परित्यागः क्रियते तत्र अर्धजरतीय न्यायः इति उच्यते। लोके एकस्मिन् शरीरे परस्परविरुद्धधर्मद्वयं युगपत् यत्र परिलक्ष्यते तत्र अर्धजरतीयन्यायः इति प्रसिद्धिः। यथा एकस्मिन् देहे अर्धभागः जरायुक्तः अपरभागः युवत्वयुक्तः इति।

अद्वैतवेदान्तदर्शने ब्रह्मणः आनन्दमयताविचारप्रसङ्गे एतस्य न्यायस्य शाङ्करभाष्ये उल्लेखकृतः अस्ति। "विकारार्थे मयट् प्रवाहे सत्यानन्दएवाकस्मादर्धजरतीयन्यायेन कथमिव मयटः प्राचुर्यार्थत्वं ब्रह्मविषयत्वं च आश्रीयते[२९] इति"।

जरा नाम वृद्धा अवस्था। एषा मनुष्यस्य अन्तिमा अवस्था भवति। अर्धः इति पदस्य अर्धभागः इति—अर्थाः। अर्धजरतीयः नाम अर्धभागः वृद्धावस्थायुक्तः इति। एवञ्च शरीरस्य अर्धभागः वृद्धावस्थायुक्तः अर्धभागः युवावस्था युक्तः इति। आकस्मिकम् अपेक्षित—अंशं स्वीकृत्य यत्र स्वानुकुलः निर्णयः क्रियते तत्र अर्धजरतीयन्यायस्य—उल्लेखः भवति। एतत्सन्दर्भे प्रयुक्तस्य भाष्यवाक्यस्य—अयं सारः—ब्रह्मणः आनन्दमयताविचारप्रसङ्गे मयट्प्रत्ययस्य विकारार्थः इति

सिद्धान्तपक्षः, प्राचुर्यार्थः इति एकदेशीमतम्। तत्र प्रकरणानुसारेण यदा मयटः विकारार्थः निश्चितः अस्ति तदा अकस्मात् तत् सर्वं परित्यज्य प्राचुर्यार्थस्य ग्रहणम् अर्धजरतीयदृष्टान्त सदृशं भवति, इति।

बीजाङ्कुरन्यायः

भगवतः सृष्टौ बीजस्य उत्पत्तिः प्रथमम् अभवत् अथवा अङ्कुरस्य इति विषये प्रचलितः एषः न्यायः। अर्थात् कार्यकारणयोः सम्बन्धः इदम् इत्थम् इति निर्णेतुं न शक्यते तत्र एतस्य न्यायस्य उपयोगः भवति। यथा लोके कुक्कुटी प्रथमम् उत अण्डम् इति।

शास्त्रेऽपि एतस्य न्यायस्य प्रयोगः दृश्यते। शाङ्करभाष्ये सृष्टिप्रवाहस्य अनादित्व निरूपणावसरे न्यायस्य अस्य प्रयोगः आचार्यशङ्करेण कृतः।

तद्यथा— "अनादित्वे तु बीजाङ्कुरन्यायेनोपपत्तेः न कश्चिद्दोषो भवति[३०]" इति। एवमेव अन्यत्र "स एवायमुपाधिः स्वापप्रबोधयो बीजाङ्कुरन्यायेन इत्यतः स एव जीवः प्रतिबुध्यत[३१]" इति।

बीजं नाम उत्पत्तेः कारणम्। अङ्कुरः नाम कार्यम्। वृक्षस्य आरम्भ अवस्था अङ्कुरः इति— उच्यते। यत्र कार्यकारणयोः पूर्वापरभावस्य निर्णयः न सम्भवति तत्र

बीजाङ्कुरन्यायः भवति। एतत्सन्दर्भे भाष्ये प्रयुक्तस्य वाक्यस्य—अयं सारः—परिदृश्यमाना—इयं सृष्टिः कदा अभवत्? इति निर्धारणं बीजाङ्कुरन्यायेन करणीयम्। तथा करणेन कः अपि दोषः इति। एवमेव जीवस्य स्वाप—प्रबोध इति अवस्थाद्वयस्य मध्ये का पूर्वा का च परा इति निर्धारणं बीजाङ्कुरन्यायेन करणीयम् इति। एवञ्च यत्र कार्य कारणयोः आदिः(आरम्भः) निर्धारयितुं न शक्यते तत्र अनादिः इति समाधानं बीजाङ्कुरन्यायेन शास्त्रे प्रदत्तम् इति।

स्वामीभृत्यन्यायः

एतस्य न्यायस्य लोके अनुभवः प्रायः सर्वेषां भवत्येव। यथा कदाचित् कश्चित् गृहस्वामी स्वामिकार्यं निर्वहति अपेक्षायां सत्यां भृत्यकार्यमपि करोति। एषः एव स्वामीभृत्यन्यायः इत्युच्यते।

आचार्यशङ्करः एतस्य न्यायस्य प्रयोगं भाष्ये कृतवान् ब्रह्मणः निमित्तोपादानत्व—अङ्गीकारप्रसङ्गे भोक्तृभोग्यसम्बन्धनाशप्रसङ्गे च न्यायस्य अस्य उल्लेखं कृतवान्। तद्यथा— ''चेतनमपि कार्यकारणं स्वामिभृत्यन्यायेन भोक्तुरुपकरिष्यति न स्वामिभृत्ययोरप्यचेतनांशस्यैव चेतनं प्रति उपकारकत्वात्[३२]'' इति।

स्वामि—भृत्य इति पदद्वयं लोकप्रचलितम् अस्ति। गृहस्य प्रमुखः गृहस्वामि भवति, राज्यस्य प्रमुखः राजा भवति, एवं च स्वामि शब्दस्य प्रमुखः सदस्यः प्रभुः इति वा उच्यते। भृत्यः इति पदस्य सेवकः इति अर्थः। यदा कश्चित् प्रधानभूतं कार्यं सम्पादयति तदा स स्वामि भवति यदा पुनः स एव सेवककार्यं करोति तदा सः भृत्यः—भवति। एवञ्च विविध क्रियाभेदम् आश्रित्य यदा एकस्य उभयथा व्यहार—भवति तदा स्वामिभृत्यन्यायः भवति। एतत्सन्दर्भे भाष्ये प्रयुक्तस्य वाक्यस्य अयं सारः— चेतनस्वभावकं ब्रह्म जगतः कारणम्। तदेव उपाधि सम्बधात् भोक्ता भवति, कदाचित् भोक्तुः उपकरोति। यदा स्वयं भोक्ता तदा स्वामिभूमिकां निर्वहति यदा भोक्तुः उपकरोति तदा भृत्यतुल्यं भवतीति।

तन्तुपटन्यायः

कार्यकारणभावस्य अवबोधनार्थं तन्तुपटन्यायस्य उपयोगः भवति। यथा पटः कार्यं तन्तुः कारणम् इति। अद्वैतवेदान्ते एकस्यैव ब्रह्मणः निमित्तोपादानत्वं च अङ्गीकृतम् तत्र आक्षेपदृष्टया पूर्वपक्षिणा एतस्य न्यायस्य उल्लेखः कृतः अस्ति। तद्यथा— "अणुगतेभ्यश्च रूपादिभ्यो द्यणुकादिगतानि रूपादीनि सम्भवन्ति तन्तुपटन्यायेनेति काणादा मन्यन्ते[३३]" इति।

तन्तुः नाम वस्त्रनिर्माणाय साधनम्। पटः नाम व्यवहारयोग्यं

वस्त्रम्, तन्तोः कार्यं वा इति उच्यते। तन्तु पटयोः सम्बन्धः अनन्यः भवति। एतत्सन्दर्भे प्रयुक्तस्य भाष्यवाक्यस्य—अयं सारः—कारणे ये गुणाः भवन्ति ते कार्ये—अपि अनुभूयन्ते। अणुगतः ये गुणाः ते द्यणुकेषु—अपि—आयान्ति यथा तन्तुगतगुणाः पटे आगच्छन्ति तद्वत् इति।

अन्धपरम्परान्यायः

अनालोच्च आकस्मिकतया कस्यचित् तत्त्वस्य स्वीकरणं यत्र भवति तत्र अन्धपरम्परान्यायः भवति। कार्यकारणविचारप्रसङ्गे शास्त्रे एतस्य न्यायस्य प्रयोगः दृश्यते।

अद्वैतवेदान्तदर्शने जगत्कारणत्वविचारसन्दर्भे योगाचारमत—निराकरणम् अनेन न्यायेन कृतम्। तद्यथा— "अनादित्वेप्यन्धपरम्परा—न्यायेनाप्रतिष्ठैवानवस्थाव्यवहारलोपिनी स्यान्नाभिप्रायसिद्धिः[३४]" इति। ब्रह्मभिन्नं अन्यत् न जगत्कारणमिति अभिप्रायः।

नेत्रद्वयेन हीनः अन्धः इति कथ्यते। तेषाम् अन्धानां परम्परा अन्धपरम्परा इति। कारणम् अनालोच्य यत्र तत्त्वस्य निर्णयः क्रियते तत्र अन्धपरम्परा भवति एतत्सन्दर्भे प्रयुक्तस्य भाष्यवाक्यस्य अयं सारः, वासना यद्यपि अनादिः तथापि तत्र अनवस्थां विना अन्धपरम्परानान्येन व्यवहार न स्यात्। तेन च पूर्वपक्षस्य बौद्धस्य अभिप्रायसिद्धिः न स्यात् इति।

ब्राह्मणपरिब्राजकन्यायः

एकस्य एव कार्यस्य सिद्धौ यत्र कार्यान्तरम् अपि स्वतः सिद्धो भवति तत्र ब्राह्मणपरिब्राजकन्यायः भवति। लोके तु अस्य न्यायस्य भेदार्थबोधनप्रसङ्गे उपयोगः भवति। यथा कश्चित् ब्राह्मणः सन्यासं स्वीकृत्य परिब्राजकः भवति ततः सः ब्राह्मणत्वं परित्यज्य परिब्राजकत्वं प्राप्नोति। परन्तु अनेकेषु सन्यासीषु तस्य वैलक्षण्यं द्योतयितुं ब्राह्मण इति विशेषणं सहकरोति।

एतस्य न्यायस्य उल्लेखः आचार्यशङ्करेण भाष्ये कृतो वर्तते। सृष्टिप्रक्रियायाम् इन्द्रियाणाम् उत्पत्तिः भूतानाम् उत्पत्तिना सहैव गतार्थता भवति अतः इन्द्रियाणाम् उत्पत्तिः न मुख्या भवति किन्तु गौणी तद्यथा– "भेदव्यपदेशस्तु कर्मचरण–योब्राह्मणपरिब्राजक न्यायेनाप्युपद्यते[३५]" "व्यपदेशोऽपि कश्चिद्भूतानां करणानां च ब्राह्मणपरिब्राजकन्यायेन नेतव्यः[३६]" इति।

ब्राह्मणः नाम उपनयादिसंस्कारेण युक्तः चतुर्षु वर्णेषु प्रथमः इति। परिब्राजकः सन्यासी इति कथ्यते। ब्राह्मणतः वैलक्षण्यं द्योतयितुं सन्यासी इति पदस्य निवेशः अत्र कृतः। एकेन उद्देश्येन अन्यत् उद्देश्यं गतार्थं भवति इति तत्त्वं बोधयितुं भाष्ये एतस्य न्यायस्य उल्लेखः कृतः। एतत्सन्दर्भे

प्रयुक्तस्य भाष्यवाक्यस्य—अयं सारः—भूतानि नाम आकाश—वायु—तेज—जल—पृथिवी इति भूतानि। करणानि नाम चक्षु—श्रोत्र—त्वक्—घ्राण—रसनादीनि इन्द्रियाणि। यद्यपि भूतानि इन्द्रियाणामपेक्षया भिन्नानि—एव भवन्ति तथापि ब्राह्मण परिव्राजक न्यायेन भूतानाम् उत्पत्ति द्वारा इन्द्रियाणाम्—उत्पत्तिः गतार्था भवति इति ।

क्षीरोदकन्यायः

लोके क्षीरोदकन्यायः प्रसिद्ध अस्ति। क्षीरेण उदकस्य मिश्रणानन्तरं सर्वं क्षीरम् इति व्यवहारः। एतस्य न्यायस्य उल्लेखः शाङ्करभाष्येऽपि वर्तते। ब्रह्मसूत्रशाङ्करभाष्ये वियदधिकरणे आकाशस्य उत्पत्तिरनुत्पत्तिः वेति विचारप्रसङ्गे न्यायस्य अस्य प्रयोग अस्ति। तदुक्तं भाष्ये— ''यच्चोक्तमाकाशस्य सर्वेणानन्यदेशकालत्वाद्ब्रह्मणा तत्कार्यैश्च सह विदितमेव तद्भवत्यतो न प्रतिज्ञा हीयते न च एकमेवाद्वितीयम् इति श्रुतिकोपो भवति क्षीरोदकवद् ब्रह्मनभसोरव्यतिरेकोपपत्तेरिति[३७]''।

क्षीरं नाम पयः, उदकं नाम जलम्। एतद् उभयं द्रव पदार्थः अस्ति। क्षीरं भास्वरशुक्लगुणयुक्तम् अस्ति, जलम् आभास्वर शुक्लगुणयुक्तं भवति। एतदुभयं यदा मिश्रीभवति तदा अनयोः भेदः कः इति ज्ञातुं न शक्यते। एवं च तत्त्वद्वयस्य अभेद यदा बोध्यते तदा क्षीरोदकन्याय भवति। भाष्ये प्रयुक्तस्य

वाक्यस्यायं सारः — आचार्यशङ्करस्य मतानुसारेण कार्यकरणयोः अभेदः—भवति। भूतानां उत्पत्तिप्रसङ्गे आकाशभूतं सर्वैः देशकालादिभिः अभेदेन तिष्ठति। ब्रह्मणः कार्यम्—आकाशः अस्ति। तस्मात् ब्रह्मणा सह अपि तस्य अभेदेन स्थितिः निश्चयेन भवति—एव। अतः एकविज्ञानेन सर्वविज्ञानप्रतिज्ञायाः हानिः न भवति।

'एकमेवद्वितीयमिति' अद्वैतं मतं न भिन्नं भवति, क्षीर—उदकयोः—मध्ये यथा अभेदः तथैव ब्रह्म नभसो अपि—अभेदः ज्ञातव्यः इति।

पञ्जरचालनन्यायः

अनेकेषु एकत्वप्रतिपादनाय एतस्य न्यायस्य प्रयोगः भवति। यथा एकस्मिन् पञ्जरे अनेके पक्षिणः स्थित्वा सम्भूयपरस्परक्रियाद्वारा पञ्जरस्य सञ्चालनं कुर्वन्ति।

शास्त्रेऽपि एतस्य न्यायस्य प्रयोगः दृश्यते। इन्द्रियेभ्यो प्राणाः इति प्रदर्शयितुं पञ्जरचालनन्यायः उपयुज्यते। तद्यथा ब्रह्मसूत्रशाङ्करभाष्ये इन्द्रियेभ्यो प्राणस्य अभिन्नताम् इच्छता पूर्वपक्षिणा एवम् उच्यते "पञ्जरचालनन्यायेनैतद्भविष्यति[३८]" इति।

पञ्जर नाम पक्षीणां बन्धनं स्थानम्। तस्य चालनं नाम

कम्पनं पञ्जरचालनम् इति उच्यते। अनेकेषु अभेदसम्पादनाय एतस्य न्यायस्य—उल्लेखः भाष्ये कृतः। एतस्मिन् सन्दर्भे प्रयुक्तस्य भाष्यवाक्यस्य अयं सारः—इन्द्रियाणि नाम तत् तत् ज्ञानसम्पादने साधनभूतानि चक्षुश्रोत्रघ्राणदीनि—प्राणेभ्यः न पृथक् भूतानि। पञ्जरचालन दृष्टान्तेन एतत् सम्भवति—इति।

अक्कमधुन्यायः

स्वसमीपस्थं वस्तु परित्यज्य तस्यैव वस्तुनः देशान्तरे अन्वेषणकरणं यत्र क्रियते तत्र अक्कमधुन्यायः भवति। यथा कस्तुरीमृगः स्व शरीरे विद्यमानं कस्तुरीम् अजानन् कस्तुरी कुत्र अस्तीति महता श्रमेण अन्वेषणं करोति स्व शरीरे एव तत् अस्ति इति नैव जानाति।

शास्त्रेऽपि एतस्य न्यायस्य प्रयोगः कृतः अस्ति। शाङ्करभाष्ये ब्रह्मप्राप्तौ कर्मणः अपेक्षा अस्तीति साधयितुं पूर्वपक्षिणा अस्य न्यायस्य उल्लेखः कृतः तद्यथा—"केवलाच्चेज्ज्ञानात् पुरुषार्थसिद्धिः स्यात् किमर्थमनेकायास समन्वितानि कर्माणि ते कुर्युः, अक्केचेन्मधुविन्देते किमर्थं पर्वतं ब्रजेत् इति न्यायात् इति[३९]।

अक्क नाम गृहस्य पुरः विद्यमानः वृक्षविशेषः। अभीष्टं वस्तु यदि स्व समीपे एव अस्ति तर्हि तस्य त्यागं कृता अन्यत्रगमनं न उचितं भवति। एतस्य न्यायस्य—उल्लेख—

भाष्ये कृतः—अस्ति। एतस्मिन् सन्दर्भे प्रयुक्तस्य भाष्यवाक्यस्य अयंसारः— अद्वैतवेदान्तमतानुसारेण ज्ञानात् एव मोक्षः नाम परम पुरुषार्थ सिद्धिः भवति—इति। एतस्मिन् विषये विमतं पूर्वपक्षि एवं कथयति केवलात् एव ज्ञानात् यदि परमपुरुषार्थस्य मोक्षस्य सिद्धिः स्यात् तर्हिः पुरुषार्थम् इच्छन्तः जनाः अनेक श्रमसाध्यानि कर्माणि कुर्युः, तर्हि को वा मूर्खः मधु—अन्वेषणार्थं अक्कं परित्यज्य पर्वतं प्रति गच्छेत् इति।

काकदन्तपरीक्षणन्यायः

निष्प्रयोजनभूतस्य कार्यस्य सम्पादने यत्र प्रवृत्तिर्जायते तत्र काकदन्तपरीक्षणन्यायः भवति। अर्थात् असम्भवस्य सम्भवत्व साधने इच्छा। यथा काकस्य दन्ता एव न सन्ति। परं कश्चित् काकस्य कति दन्ताः सन्ति इति गणनायां प्रवर्तते तेन न किमपि प्रयोजनं सिद्ध्यति।

एतस्य न्यायस्य कठोपनिषद्भाष्ये आचार्यशङ्करः उल्लेखं कृतवान्। ब्रह्मजिज्ञासुना नचिकेतसा मृत्युः अनन्तरम् आत्मा भवति वा न वा इति यमराजः पृष्टः तस्य जिज्ञासायाः समाधानं दातुम् अनिच्छया यमराजः नचिकेतसं प्रति एतत्न्यायं प्रयुक्तवान्। ''नचिकेतो! मरणं मरणसम्बद्धं प्रश्नं प्रेतेऽस्ति नास्तीति काकदन्तपरीक्षारूपं मानुप्राक्षीः[४०]'' इति।

काकः नाम वायस् पक्षी तस्य दन्ताः काकदन्ताः तेषां परीक्षणं काकदन्तपरीक्षणम्। असम्भवस्य विषये प्रयासकरणं यत्र भवति तत्र एतस्य काकदन्तपरीक्षणन्यायस्य—उल्लेखः—भवति। एतस्मिन् सन्दर्भे भाष्ये प्रयुक्तस्य वाक्यस्य—अयं सारः—आत्मजिज्ञासु नचिकेता यदा यमस्य गृहं प्राप्तवान् तदा यमः गृहे न आसीत्। नचिकेता भोजनेन विना यमस्य गृहे तस्य प्रतीक्षां कृत्वा स्थितवान्। तदर्थं यमराजः नचिकेतसः कृते वरत्रयं दत्तवान्। तेषु वरेषु आत्मतत्त्वविषयकं अन्तिमं वरं नचिकेता यमाय पृष्टवान्। तस्मिन् काले यमराजः नचिकेतसं प्रति मरणं, मरणसम्बद्धं, अस्ति—नास्ति इत्यादि प्रश्नाः काकदन्तपरीक्षणरुपाः सन्ति अतः एतादृशान् असम्भवान् निष्प्रयोजनान् प्रश्नान् भवान् न पृच्छतु इति। "नचिकेतो! मरणं मरणसम्वद्धं प्रश्नं प्रेतेऽस्ति नास्तीति काकदन्तपरीक्षारुपं मानुप्राक्षीः"इति उक्तवान्।

काकतालीयन्यायः

आकस्मिकं कार्यद्वयं समसमयं यत्र सम्पत्स्यते तत्र काकतालीयन्यायः भवति। तस्य न्यायस्य लोके एवं वर्णनं क्रियते यथा कश्चित् काकः यदा कस्मात् चित् देशात् ड़यनं कृत्वा आगत्य आम्रवृक्षस्य उपरि उपविष्टः तदानीम् एव आम्रफलम् अपतत्। एतत् एव काकतालीयन्यायः इति उच्यते।

शाङ्करभाष्ये आचार्यशङ्करेण एतस्य उल्लेखः कृतः वर्तते। क्षीणे पुण्ये मर्त्यलोकं विशन्ति इति श्रुत्या पुण्यकर्मणां यदा क्षयः भवति तदा येनमार्गेण पुण्यस्य भोगाय मनुष्य गतः तेनैव मार्गेण अवरोहणं करोति। अवरोहणसमये काकतालीयन्यायेन शेषपुण्यकर्मबलात् दैववशात् च पुनः जीवभावं प्राप्नोति। तदुच्यते छान्दोग्यभाष्ये– "कदाचित् काकतालीयवृत्या रेतः सिग्भिर्भक्ष्यन्ते यदा तदा रेतः सिग्भावं गतानां कर्मणो वृत्तिलाभः[४]"।

आकस्मिकं कार्यद्वयं यदा एकस्मिन् एव समये सम्भवति तदा काकतालीयन्यायः इति उच्यते। एतस्मिन् सन्दर्भे प्रयुक्तस्य भाष्यवाक्यस्य–अयं सारः–कदाचित् आकस्मिकरुपेण नाम पूर्वम् न चिन्तितम्–अपि काकतालीय वृत्तिद्वारा रेतः सिञ्च्यते तदा रेतः स्त्रिग्भावं प्राप्य गतानां कर्मणां वृत्तिं प्राप्नोति अर्थात् तदाकारकारितो भवति–इति।

अनेकदेहादानन्यायः

स्वेच्छया युगपत् यत्र अनेकशरीरधारणं सम्भवति तत्र अनेकदेहादानन्यायः भवति। शाङ्करभाष्ये एतस्य न्यायस्य उल्लेखः कृत दृश्यते। पूर्वपक्षी ब्रह्मविद्यया आत्यन्तिकी मुक्तिः न सम्भवति इति साधयितुं न्यायस्य अस्य उल्लेखं कृतवान्।

तद्यथा— ''केचित्तु स्थिते एव तस्मिन्योगैश्वर्य वशादनेक—देहादानन्यायेन[४२]'' इति।

अनेकानां शरीराणाम् एकस्मिन् एव समये धारणं अनेकदेहादानः इति—उच्यते। एतस्मिन् सन्दर्भे प्रयुक्तस्य भाष्यवाक्यस्य—अयं सारः—योग—ऐश्वर्य—बलात् मुक्तिः प्राप्तुं शक्या इति कर्मवादीनाम्—आशयः। केवलात् ब्रह्मज्ञानात् आत्यनतिकी मुक्तिः न सम्भवति इति। केचित् योगिजनाः स्वस्य अप्रतिमयोगशक्तिद्वारा एकस्मिन् एव समये अनेकानि प्रयोजनानि साधयन्ति। तादृशानां कृते मुक्तिप्राप्त्यर्थं ब्रह्मानन्दस्य का आवश्यकता अस्ति—इति।

लीलान्यायः

सतिसामर्थ्ये यत्र महद्भूतमपि कार्यं अनायासेन सम्पाद्यते तत्र लीलान्यायः भवति। लोके राजा यथा सर्वसाधनसम्पन्नः एकत्र उपविश्य अनायासेन यत्किञ्चित् कार्यं सम्पादयति।

शास्त्रेऽपि एतस्य न्यायस्य उल्लेखः वर्तते। वेदान्ते सृष्टिः ब्रह्मणः लीलामात्रमिति वर्णितम् अस्ति। तद्यथा— ''अनेकशाखाभेदभिन्नस्य देवतिर्यङ्मनुष्यवर्णाश्रमादि हेतोः ऋग्वेदाद्याख्यस्य सर्वज्ञानाकरस्याप्रयत्ननैव लीलान्यायेन पुरुषनिः श्वासवद्यस्मान्महतोभूताद्योनेः सम्भवः[४३] इति।

लीला नाम मनोरञ्जनम्। श्रमं विना कार्य सम्पादनम् इति। एतस्मिन् सन्दर्भे प्रयुक्तस्य भाष्यवाक्यस्य—अयं सारः—अद्वैतवेदान्तसिद्धान्तस्य अनुसारेण जगतः सृष्टिः ब्रह्मणः सकाशात् भवति इति। एतस्याः अतिविचित्रसृष्टेः सम्पादनं सर्वज्ञं ब्रह्म लीलामात्रेण करोति। अनेकशाखायुक्ताः वेदादि विद्याः सर्वज्ञानसागरभूताः उच्छ्वासः निःश्वास मात्रेण ब्रह्मणा सृष्टा इति।

निकृष्टे उत्कृष्टदर्शनन्यायः

सामान्यस्य उत्कर्षतां द्योतयितुं यत्र उत्कृष्टस्य धर्मस्य आरोपः क्रियते तत्र निकृष्टे उत्कृष्टन्यायः इति कथ्यते। लोके पुत्र सदृशः पिता इत्युच्यते। शास्त्रेऽपि एतस्य न्यायस्य उपयोगः कृतः दृश्यते। ब्रह्मसूत्रशाङ्करभाष्ये आचार्यशङ्करेण एतस्य न्यायस्य उल्लेख कृत अस्ति। तद्यथा—"उत्कृष्टदृष्टिहि निकृष्टे—ऽध्यासितव्येति लौकिकन्यायः[४४]" इति।

उत्कृष्टः नाम उत्तमः। यस्मिन् कस्मिन् अनुत्तमे उत्तमा भावनायाः चिन्तनं निष्कृष्टे उत्कृष्टदर्शनन्यायः इति—उच्यते। सामान्यस्य विशेषता सम्पादनाय एतस्य न्यायस्य—उल्लेखः भवति। एतस्मिन् सन्दर्भे भाष्ये प्रयुक्तस्य वाक्यस्य—अयं सारः—निकृष्टे वस्तुनि उत्कृष्टगुणस्य एव आरोपकरणीयः न तु उत्तमे अनुत्तमस्य आरोपः इति।

नरनगरन्यायः

नरः केनचित् साधनेन ग्रामं परित्यज्य स्थानान्तरं यत्र प्राप्नोति तत्र नरनगरन्यायः भवति। यथा कश्चितपुरुषः वाहनादि द्वारा नगरं प्राप्नोति।

शास्त्रेऽपि एतस्य न्यायस्य उल्लेखः वर्तते। यथा आचार्यशङ्करः भाष्ये जीवः ब्रह्मणः अपेक्षया भिन्नः इति प्रदर्शयितुं नरनगरन्यायस्य उल्लेखं कृतवान्। तद्यथा– "मितानां च मितेन सम्बन्धो दृष्टो यथा नराणां नगरेण जीवानां च ब्रह्मणा सम्बन्धं व्यपदिशति सुषुप्तौ[४५]" इति।

नरः नाम मनुष्यः नगरः नाम सभ्यजनानां आवासस्थानम् इति। यत्र उपाधिसम्बन्ध द्वारा एकस्मिन् एव भेदेन व्यवहार भवति तत्र नरनगरन्यायः इति उच्यते। एतस्मिन् सन्दर्भे प्रयुक्तस्य भाष्यवाक्यस्य अयं सारः–यथा नराणां नगरेण सम्बन्धः यथा वा मितानां मितेन सम्बन्धः भवति तथैव सुषुप्ति–अवस्थायां जीवस्य ब्रह्मणा सह सम्बन्धः भवति–इति।

कण्ठचामिकरन्यायः

एतस्य न्यायस्य अनुभवः लोके सर्वेषां जीवने भवति एव। यत्र स्वस्य वस्तु भ्रान्त्या नष्टमिति ज्ञानम् आदौ भवति ततः अन्येन स्मारणं यदा क्रियते तदा तद्वस्तु तत्रैव अस्ति इति

ज्ञानं भवति, तत्र कण्ठेचमिकरन्यायः भवति। यथा लोके कस्याश्चित् महिलायाः कण्ठेहारः अस्ति। अज्ञानात् मम हारः नष्टः इति सा अनुभवति, तत्कारणात् दुःखमपि अनुभवति परम् अपरया कयाचित् महिलया तव कण्ठेहारः इति यदा स्मार्यते तदा सा हारं प्राप्य अत्यन्तम् आनन्दम् अनुभवति। यथा पूर्वमप्ताप्तस्य प्राप्तौ आनन्दः भवति तथा।

शास्त्रेऽपि एतस्य न्यायस्य वहुशः प्रयोगः कृत अस्ति। अद्वैतवेदान्तदर्शने आत्मावाप्तिः मोक्षः इत्युच्यते। परं जीवः अज्ञानवशात् स्वं रूपं न अभिजानाति। यदा ज्ञानेन अज्ञानस्य निवृत्तिः भवति तदा स्वस्वरूपावाप्तिः भवति। अत्र आत्मावाप्तिः कण्ठेचामिकरन्यायेन अभवत् इति अद्वैतीनामाशयः।

कण्ठः नाम ग्रीवाप्रदेशः। चामिकरः नाम हारः, आभूषणविशेषः। चामिकरस्य स्थितिः सदा कण्ठे भवति। भाष्ये एतस्य न्यायस्य सन्दर्भे वाक्यानि उल्लिखितानि। तेषां वाक्यानामयं सारः—अद्वैतवेदान्तमतानुसारेण आत्मनः स्वरुपज्ञानं मोक्षः इति। आत्मा यद्यपि सर्वस्मिन् अस्ति तथापि अज्ञानकारणतः तस्य ज्ञानं न भवति। अतः सर्वे आत्मानं परित्यज्य आत्मा कुत्र इति अन्वेषणं कुर्वन्ति। परन्तु आत्मनः प्राप्तिः कण्ठेचामिकर न्यायेन भवति—इति।

द्विचन्द्रदर्शनन्यायः

नभसि चन्द्रः एक एव इति यद्यपि सर्वेषां ज्ञानम् अस्ति तथापि केनचित् दोषकारणेन तस्मिन् कस्यचित् द्वित्वज्ञानं जायते एव। एष एव द्विचन्द्रदर्शनन्यायः भवति। एतस्य न्यायस्य उल्लेखः शास्त्रेऽपि कृतः अस्ति। शाङ्करभाष्ये मुक्तिः अनारब्धकर्म–प्रसङ्गे एषः न्यायः प्रयुक्तः।

तद्यथा–" सत्यपि सम्यग्दर्शने यथा प्राग्देहपाताद्भेददर्शनं द्विचन्द्रदर्शनन्यायेनानुवृत्तमेवं पश्चादप्यनुवर्तेत[४६]" इति।

एकस्य एव चन्द्रस्य केनचित् उपाधिकारणेन अनेकतारुपेण–अनुभवः द्विचन्द्रदर्शनन्यायः इति–उच्यते। एतस्य सन्दर्भे भाष्ये प्रयुक्तस्य वाक्यस्य–अयं सारः–आत्मा एक एव इति यद्यपि निश्चयज्ञानम्–अस्ति तथापि देहधारणात् परं एकमेव आत्मा द्वित्वरुपेण अनुभूयते। द्विचन्द्रन्यायेन इति।

आदर्शगतछायान्यायः

उपाधिसम्बन्धेन यत्र एकस्य वस्तुनः अनेकता रूपेण प्रतीतिः तत्र आदर्शगत छायान्यायः भवति। यथा लोके एकस्य एव मुखस्य पञ्चसु दर्पणेषु सम्बन्धे सति पञ्चप्रतिविम्बानि दृश्यन्ते।

शास्त्रेऽपि एतस्य न्यायस्य प्रयोगः शास्त्रकारैः कृत अस्ति।

जीवस्य स्वरूपविचारप्रसङ्गे एतस्य न्यायस्य उल्लेख: आचार्यशङ्करेण कृत: वर्तते। तद्यथा— उपाधिगत दोषेण उपहित: दुष्ट: न भवति। यथा दर्पणे प्रतिबिम्बितं छाया दर्पणदोषेण दुष्टा न भवति। एवमेव अन्त:करणोपाधिसम्बन्धं प्राप्य अपि आत्मा तद्गतदोषै: लिप्त: न भवति। प्रतिबिम्बस्वरूप: जीव: इति प्रमाणयति इयं श्रुति:—''सेयं देवतैक्षत हन्ताऽहंमिमास्तिस्रोदेवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरणवाणि[४७]'' इति।

आदर्श नाम दर्पण:। आदर्शे मुखस्य प्रतिबिम्ब: दृश्यते। तस्मिन् दर्पणे दृष्टा छाया आदर्शगतछाया न्याय: इति— दच्यते। एतस्मिन् सन्दर्भे प्रयुक्तस्य भाष्यवाक्यस्य—अयं सार:—जीव: ब्रह्मण: अपेक्षया न भिन्न:। जीवस्य य: जीवत्वरुप—व्यवहार: स: प्रतिबिम्बरुप: यथा दर्पणगत छाया प्रतिबिम्ब भवति। तथैव अन्त:करणेन सम्बन्धस्य आत्मन: जीव: इति व्यवहार अद्वैतवेदान्ते इति।

❖ ❖ ❖ ❖ ❖

❖ ❖ ❖

सन्दर्भग्रन्थसूची

१. न्या.द.वा.भा.–१/१
२. महा.भा.– २/५/३
३. ब्र.सू.शा.भा.–१/४/१७
४. ब्र.सू.शा.भा.–१/१/७
५. ब्र.सू.शा.भा.–३/१/२२
६. केन.उ.शा.भा.– २/४
७. गौड़पादकारिका– २/३
८. गीता.शा.भा.– १३/२
९. बृ.उ.शा.भा.– ४/४/२२
१०. बृ.उ.शा.भा.– ४/३/१५
११. ब्र.सू.शा.भा.– १/१/७
१२. ब्र.सू.शा.भा.– १/१/८
१३. ब्र.सू.शा.भा.– १/४/२८
१४. ब्र.सू.शा.भा.– १/१/१३
१५. ब्र.सू.शा.भा.– २/१३४
१६. तै.उ.– २/१
१७. ब्र.सू.शा.भा.– २/३/१४
१८. ब्र.सू.शा.भा.– ३/२/२२
१९. ब्र.सू.शा.भा.– ३/२/२७
२०. ब्र.सू.शा.भा.– ४/३/३
२१. ब्र.सू.शा.भा.– ४/३/१५
२२. भ.गीता– ४/११
२३. का.उ.शा.भा.–१/३/१
२४. ब्र.सू.शा.भा.– ३/३/३४

२५. ब्र.सू.शा.भा.– ३/१/२
२६. ब्र.सू.शा.भा.– ३/२/१०
२७. तै.उ.शा.भा.– २/१/१
२८. छा.उ.शा.भा.– ५/१८/१
२९. ब्र.सू.शा.भा.– १/१/१९
३०. ब्र.सू.भा.– २/१/३६
३१. ब्र.सू.भा.– ३/२/९
३२. ब्र.सू.भा.– २/१/४
३३. ब्र.सू.शा.भा.– २/२/१२
३४. ब्र.सू.शा.भा.– २/२/३०
३५. ब्र.सू.शा.भा.–३/१/११
३६. ब्र.सू.शा.भा.–२/३/१५
३७. ब्र.सू.शा.भा.–२/३/६
३८. ब्र.सू.शा.भा.–२/४/९
३९. ब्र.सू.शा.भा.– ३/४/३
४०. क.उ.शा.भा.–१/१/२५
४१. छा.उ.शा.भा.– ५/१०/६
४२. ब्र.सू.शा.भा.– ३/३/३२
४३. ब्र.सू.शा.भा.– १/१/३
४४. ब्र.सू.शा.भा.– ४/१/५
४५. ब्र.सू.शा.भा.– ३/२/३१
४६. ब्र.सू.शा.भा.–४/१/१९
४७. छा.उ.– ६/३/२

❖ ❖ ❖ ❖ ❖

न्यायानां वर्णानुक्रमणिका

१.	अन्धगोलाङ्गूलन्यायः	२.	अहिकुण्डलन्यायः
३.	अन्तर्दीपिकान्यायः	४.	अर्धजरतीयन्यायः
५.	अनेकदेहादानन्यायः	६.	आदर्शगत छायान्यायः
७.	इषुकारन्यायः	८.	काकदन्तपरीक्षणन्यायः
९.	काकवालीयन्यायः	१०.	कण्ठचामिकरन्यायः
११.	गजान्धन्यायः	१२.	छत्रिन्यायः
१३.	तत्क्रतुन्यायः	१४.	तन्तुपटन्यायः
१५.	स्थूलारुन्धतीन्यायः	१६.	स्थूणनिखननन्यायः
१७.	दशमस्त्वमसिन्यायः	१८.	द्विचन्द्रदर्शनन्यायः
१९.	निष्कृष्टे उत्कृष्टदर्शनन्यायः	२०.	नरनगरन्यायः
२१.	पङ्कप्रक्षालनन्यायः	२२.	परिशेषन्यायः
२३.	पञ्जरचालनन्यायः	२४.	प्रधानमल्लनिर्वहणन्यायः
२५.	बीजाङ्कुरन्यायः	२६.	ब्राह्मणपरिब्राजकन्यायः
२७.	लीलान्यायः	२८.	विष्णुप्रतिमान्यायः
२९.	समुद्रतरङ्गन्यायः	३०.	सोपानावरोहणन्यायः
३१.	स्वामीभृत्यन्यायः	३२.	क्षीरोदकन्यायः

लेखकपरिचयः

डॉ० सुकान्तकुमारसेनापतिः १९६५ तमे वर्षे जुलाईमासस्य २० दिनाङ्के कटकमण्डलस्थितपलशाग्रामे जन्म अलभत। श्री सेनापतिः जगत्सिंहपुरे हाईस्कुलपठनं परिसमाप्य भुवनेश्वरस्य बी.जे.वी. महाविद्यालये कलाविभागे संस्कृत, अर्थशास्त्र, राजनीति, तर्कशास्त्रविषयान् च स्वीकृत्य इंटरमीडिएट पठितवान्। ततः राष्ट्रिय-संस्कृतसंस्थानान्तर्गते तिरुपतिस्थकेन्द्रीयसंस्कृतविद्यापीठे प्राक्शास्त्री कक्ष्यातः आचार्यकक्ष्यापर्यन्तं सुप्रसिद्धानां विदुषां सकाशे शांकरवेदान्त-दर्शनमधिगतवान्। ततः तस्मात् विद्यापीठात् अद्वैतवेदान्तशास्त्रविषये विद्यावारिध्युपाधिमलभत। अध्ययनकाले श्री सेनापति विद्यापीठ, विश्वविद्यालयराष्ट्रस्तरीय वाक्-प्रतियोगितासु वेदान्त, न्याय, जैन, सांख्यादि विषयेषु भागं गृहीत्वा अनेकान् पुरस्कारान् प्राप्तवान्। भारतसर्वकारस्य शिक्षाविभागद्वारा आयोजितायाम् अखिलभारतीय-संस्कृतभाषणस्पर्धायां वेदान्त-सांख्य-मीमांसादिशास्त्रेषु स्वर्णपदकद्वयं, रजतपदकद्वयं च अलभत। विविधासु शास्त्रगोष्ठीषु राष्ट्रीय आलोचना चक्रेषु च भागं गृहीत्वा तत्र पत्रं पठित्वा विदुषां प्रशंसाभाजः अभवत्।

श्री सेनापतिः नवदेहलीस्थराष्ट्रियसंस्कृतसंस्थाने अनुसन्धानसहायक पदे १९९३ अप्रैलमासतः १९९७ सितम्बरमास पर्यन्तं कार्यमकरोत्। ततः राष्ट्रियसंस्कृतसंस्थानान्तर्गते शृंगेरीस्थराजीवगान्धीकेन्द्रीयसंस्कृत-विद्यापीठे अद्वैतवेदान्तव्याख्यातृपदमलकृत्य अप्रैलमासे, २००१ नवदेहलीस्थराष्ट्रियशैक्षिकअनुसन्धानपरिषदि विद्यमानायां राष्ट्रियसंस्कृत-परियोजनायां संयुक्तपरियोजनासमन्वयकपदं सभाज्य संस्कृतशिक्षणं संस्कृतमाध्यमेन इति विषये कार्यं सम्पादयन् विराजते।

CONCIEVED BY : NATIONAL MARKETINGS, DELHI-6 MOBILE : 9811014522